**This Question Paper consists 35 questions and 4 printed pages.**
**अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।**

**Roll No.**
**अनुक्रमाङ्कः** | | | | | | | | | | | | |

**Code No. 60/S/A**
**गूढसंख्या**

**Set**
**स्तबकः** **A**

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of two Invigilators** **1.** ____________________
**(निरीक्षकयोः हस्ताक्षरम्)**
**2.** ____________________

---

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एवं लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एवं लेख्यानि ।

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

निर्देशाः :

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः×प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

**[A]** दशानां प्रश्नानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) पञ्चतन्त्रस्य रचयिता कः ?

(क) नारायणशर्मा (ख) शिवदासः

(ग) गङ्गादासः (घ) विष्णुशर्मा

(2) वचो हि सत्यं परमं विभूषणम् – किं छन्दः ?

(क) मालिनी (ख) शार्दूलविक्रीडितम्

(ग) उपजातिः (घ) वंशस्थविलम्

(3) आलङ्कारिकनये अर्थस्य कति भेदाः ?

(क) त्रयः (ख) चत्वारः

(ग) पञ्च (घ) षट्

(4) अवृत्तिरल्पवृत्तिर्वा रीतिः का ?

(क) वैदर्भी (ख) गौडी

(ग) लाटी (घ) पाञ्चाली

(5) व्यायोगस्योदाहरणं किम् ?

(क) पद्मप्राभृतकम् (ख) त्रिपुरदाहः

(ग) मत्तविलासः (घ) सौगन्धिकाहरणम्

(6) कारयित्रीप्रतिभावान् कः भवति ?

(क) सहृदयः (ख) कविः

(ग) नायकः (घ) प्रतिनायकः

(7) रामलक्ष्मणौ कस्या नद्यास्तीरे उपस्थितौ ?

(क) गङ्गानद्याः (ख) सरस्वतीनद्याः

(ग) यमुनानद्याः (घ) पम्पानद्याः

(8) सिंहविप्रेक्षितौ वीरौ... – इति श्लोके कः अलङ्कारः ?

(क) उत्प्रेक्षा (ख) उपमा

(ग) रूपकम् (घ) दृष्टान्तः

(9) 'शिक्षा क्षयं गच्छति कालपर्ययात्' – इति कस्य वचनम् ?

(क) कर्णस्य (ख) दुर्योधनस्य

(ग) इन्द्रस्य (घ) शल्यस्य

(10) अरिषड्वर्गेषु किं नान्तर्भवति ?

(क) लोभः (ख) क्रोधः

(ग) कामः (घ) दुःखम्

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत । **2×10=20**

(1) कति दोषाः पुरुषेण हातव्याः ? के च ते ? 1+1

(2) कीदृशः मनुष्यः साक्षात् पशुः इव ? पशूनां परमं भागधेयं किम् ? 1+1

(3) ''कः त्यागी'' इति कथायां कः किमर्थं त्यागी ? 1+1

(4) ''मूर्खानां न समादरः'' इति कथायां चत्वारो ब्राह्मणा विद्यालाभाय कुत्र प्रस्थिता ? कति वर्षाणि व्याप्य तैरध्ययनं कृतम् ? 1+1

(5) आलङ्कारिकनये कति रसाः ? के च ते ? 1+1

(6) हनुमान् किमर्थं कस्मात् पर्वतात् रामलक्ष्मणाभ्यां साकं साक्षात्कर्तुम् आगतवान् ? 1+1

(7) रणे निष्फलता नास्ति कथम् ? 1+1

(8) ''महत्तरां भिक्षां याचे'' इति कस्य वचनम् ? स किमर्थं भिक्षुरूपं गृहीतवान् ? 1+1

(9) ''स सन्ततं दर्शयते गतस्मयः'' – अत्र गतस्मयः कः ? गतस्मयः इत्यत्र कः समासः? 1+1

(10) ''हितं मनोहारि च दुर्लभं वचः'' – कस्योक्तिः ? स कुत्र समाययौ ? 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) विधेर्बलवत्त्वं सुभाषिताधारेण लिखत ।

(2) दानं भोगो नाशस्तिस्रो गतयो वित्तस्य ।

यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ इति श्लोकं व्याख्यात ।

(3) अपदो दूरगामी च साक्षरो न च पण्डितः ।

अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥ इति श्लोकं व्याख्यात ।

(4) ''को मे भर्ता'' इति कथानुसारं तापसस्य वृत्तान्तं लिखत ।

(5) वक्रोक्त्यलङ्कारं सोदाहरणं व्याख्यात ।

(6) एवं गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ।

तस्य सिध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः ॥ इति श्लोकं व्याख्यात ।

(7) हनुमन्तं प्रति लक्ष्मणेन किमुक्तमिति स्वभाषया लिखत ।

(8) कर्णभारनाटकस्य मङ्गलश्लोकं व्याख्यात ।

(9) वनेचरवचनानुसारं तस्य चतुरः चारगुणान् वर्णयत ।

(10) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीया प्रभवोऽनुजीविभिः ।

अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ इति इति श्लोकं स्वगिरा व्याख्यात ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) ''शतचन्द्रं नभः स्थलम्'' इति समस्याश्लोकं व्याख्यात ।

(2) सङ्केतग्रहोपायान् सोदाहरणं लिखत ।

(3) ''रामहनुमत्संगमः'' इति पाठ्यांशाधारेण हनुमतः पाण्डित्यं दर्शयत ।

(4) ''कर्णभारम्'' इति नाटकमाश्रित्य इन्द्रकर्णयोः कथोपकथनं समासेन उपस्थापयत ।

(5) दुर्योधनस्य गूढतत्त्वकथनात् प्राक् युधिष्ठिरं प्रति वनेचरेण उक्तं वचनं स्वभाषया लिखत ।

---